३६

चरणव्यूह

संस्कृत

पृ. ४

श. १७१५

पूर्ण.

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1 A)

णमुच्यते ऽ एकश्चैकवर्गश्चैकश्च नवकस्तथा द्वौ वर्गौ द्विः ऽ चौ ज्ञे यो त्रीणि त्रीणि शतस्तथास
हस्रमेकं पंचकानां शतमनुविंशं सप्तकानां द्वे च सप्तोत्तरे शते च तु ऽ चे त्रीणि शतानि षट्का
नां त्रीण्यं षष्टिरष्टकानां शाकल्ये दृष्टे पदे लक्षमेकं सार्धं तु वेदे त्रिसहस्रयुक्तं शतान्यष्टौ षड्विं
शतिः पदसंख्याः प्रकीर्तिताः ॥१॥ यजुर्वेदस्य षडशीतिर्भेदा भवंति तत्र चरकानाम दश भे
दा भवंति चरका ऽ आह्वरकाः कठाः प्राच्यकठाः कपिष्टलकठाः चारायणीया वार्तंतवेयाः
श्वेताः श्वेततरा मैत्रायणीयाश्चेति तत्र मैत्रायणीया नाम सप्तभेदा भवंति मानवा दुंदुभाश्चै
केया वाराहा हारिद्रवेयाः श्यामाः श्यामायणीयाश्चेति तेषामध्ययनमष्टाशतं यजुःसहस्रा
ण्यधीत्य शाखापारो भवति तान्येव द्विगुणान्यधीत्य पदपारो भवति तान्येव त्रिगुणान्यधी
त्य मपारो भवति षडंगान्यधीत्य षडंगविद्भवति शिक्षा कल्पो व्याकरणं नेरुक्तं छंदो ज्योतिष
मित्यंगानि तत्र प्राच्य ऽ उदीच्यानि ऽ नैऋत्यानि ऽ त्य स्तत्र वाजसनेयानामत्रयोदश भेदा भवं

(1)

चरण॰ श्रीगणेशाय नमः ॐ ॥ अथातश्चरणव्यूहं व्याख्यामस्तत्र यदुक्तं चातुर्वैद्यं चत्वारो वेदा विज्ञाता भवं
॥१॥ ति ऋग्वेदो यजुर्वेदः सामवेदो ह्यथर्ववेदश्चेति तत्र ऋग्वेदस्याष्ट भेदा भवंति चर्चा श्रावकः चर्चकः श्र
वणीयपारः क्रमपारः क्रमजटः क्रमपठः क्रमरथः क्रमदंडश्चेति चतुष्पारायणमेतेषां शाखाः पं
च भवंत्याश्वलायनी सांख्यायनी शाकला बाष्कला मांडूकेयाश्चेति तेषामध्ययनमध्यायाश्च
तुःषष्टिर्मंडलानि दशैव तु वर्गाणां परिसंख्यातं द्वे सहस्रे षट्कुत्तरे सहस्रमेकं सूक्तानां निर्विशं
खं विकल्पितानां दश सप्त सु पठ्यं ते संख्यातं वै पदक्रमं एकं शतसहस्रं वा त्रिपंचाशत्सहस्रार्ध
मेतानि च दर्शितानि शिक्षानामितरेषां पंचाशीतिः क्रमकाले तु वे स्यं चतुस्त्रिंशत्सहस्राणि
द्विखंडानां सहस्राणां द्वात्रिंशतं च षोडशोत्तराश्चत्वारि च शतसहस्राणि द्वात्रिंशतं चाक्ष राम
रसहस्राणि ऋचां दश सहस्राणि ऋचां पंच शतानि ऋचामशीतिः पादश्चैतत्पाराय ॥१॥

Joint project of the Rajawade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

शक्रेणापि हृतात्मनष्टाः शेषां प्रवक्ष्याम्यासुरायणी यावासुवायणीयाः प्रांजलिरुग्रे नर्वीयाः प्रां
तवेमाः प्राचीयोग्यानयोग्याश्चेतितत्र राणायनीया नाम नव भेदा भवंति राणायनीयाः शा
ट्यांतवेयाः शाट्यमुद्गलाः खल्वलाः महाखल्वलाः लांगलाः कौथमा गोतमा जैमिनीयाश्चे
ति तेषामध्ययनमष्टौ सामसहस्राणि सामानि चतुर्दश चतुर्दशान्यदशाति दश सप्तसु वालु
रिवल्यः ससुवर्णः प्रयच्छत्येतत्सामगाणं स्मृतं ॥३॥ अथर्ववेदस्य नव भेदा भवंति पैप्पलादाः
नाः स्तुदांता स्तौंनाः ओतां ब्रह्मदावलाः शौनकी देवदर्शी चरणविद्याश्चेति तेषामध्ययनं पं
चकल्पानि भवंति नक्षत्रकल्पो विधानकल्पो विधिविधानकल्पः कल्पः कल्पः संहिताः शां
ति कल्पश्चेति सर्वेषामेव वेदानामुपवेदा भवंति ऋग्वेदस्यायुर्वेद उपवेदो यजुर्वेदस्य धनुर्वे
दोपवेदो सामवेदस्य गांधर्ववेदोपवेदो ऽथर्ववेदस्य शस्त्रशास्त्राणि भवंति ऋग्वेद
स्यात्रिगोत्रं ब्रह्मदैवत्यं गायत्रं छंदः ॥ यजुर्वेदस्य भरद्वाजगोत्रं रुद्रदैवत्यं त्रैष्टुभं छंदः ॥

(3A)

यः इदं चरणव्यूहं श्राद्धकाले सदा पठेत् ॥ अक्षय्यं तद्भवेच्छ्राद्धं पितॄंश्चैवोपतिष्ठते ॥ योधीते चरण
व्यूहं स विप्रः पंक्तिपावनः ॥ तारयत्यखिलान्सर्वान्पुरुषान्सप्तसप्त च ॥ यो नाम श्रुणुते देवाः अमृ
तत्वं च गच्छति ॥ अमृतत्वं च गच्छत्यों नमो नमः इत्याह भगवान्व्यासः पाराशर्यो नमो नमः परम
ऋषिभ्यो नमः परमऋषिभ्यो नम इति ॥ ५ ॥ इति चरणव्यूहः समाप्तः ॥ ॥ शाके १७१५
प्रमादीनाम संवत्सरे उत्तरायणे वसंततौ वैशाखमासे कृष्णपक्षे द्वितीयां तिथौ मंद
वासरे द्विलीयप्रहरे तद्दिनी इदं पुस्तकं समाप्तं ॥ ॥ वाटवोपनामकनिळकंठसूत तप
माकरेण लिखितं ॥ स्वार्थं परार्थं च ॥ भग्नपृष्ठकटिग्रीवा स्तब्धदृष्टिरधोमुखं ॥ कष्टे
न लिखितं ग्रंथं यत्नेन परिपाल्यतां ॥ श्रीरामचंद्र प्रसन्न ॥ श्रीकृष्णार्पणमस्तु ॥ ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com